श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री रामानुजाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री रामानुजाष्टकम् ॥

रामानुजाय मुनये नम उक्तिमात्रम्
    कामातुरोऽपि कुमतिः कलयन्नभीष्टम्।
यामामनन्ति यमिनां भगवज्जनानाम्
    तामेव विन्दति गतिं तमसः परस्तात्॥ 1॥

सोमावचूड सुरशेखरदुष्करेण
    कामातिदोऽपि तपसा क्षपयन्नघानि।
रामानुजाय मुनये नम इत्यनुक्त्वा
    कोवा महीसहचरे कुरुतेनुरागम्॥ 2॥

रामानुजाय नम इत्यसकृद्गृणीते
    यो मान मत्सर मदस्मर दूषितोऽपि।
प्रेमातुरः प्रियतमामपहाय पद्मां
    भूमा भुजङ्ग शयनस्तमनुप्रयाति॥ 3॥

वामालकासयनवागुरिकागृहीतं
    क्षेमाय किञ्चिदपि कर्तुमनीहमानम्।
रामानुजो यतिपतिर्यदि नेक्षते मां
    मा मामकोयमिति मुञ्चति माधवोऽपि॥ 4॥

रामानुजेति यदिदं विदितं जगत्यां
    नामापि न श्रुतिसमीपमुपैति येषाम्।
मा मा मदीय इति सद्भिरुपेक्षितास्ते
    रामानुविद्धमनसो निपतन्त्यधोधः॥ 5॥

नामानुकीर्त्य नरकार्तिहरं यदीयं
व्योमाधिरोहति पदं सततलोपि लोकः।
रामानुजो यतिपतिर्यदि नाविरासीत्
को यादृशः प्रभविता भवमुत्तरीतुम्॥ 6॥

सीमामहीध्रपदविं पृथिवीमवाप्तुं
वैमानिकेश्वरपुरीमधिवासितुम् वा।
व्योमाधिरोढुमपि न स्पृहयन्ति नित्यं
रामानुजाङ्घ्रियुगळं शरणं प्रपन्नाः॥ 7॥

मा मा धुनोति मनसोऽपि न गोचरं यत्
भूमासखेन पुरुषेण सहानुभूय।
प्रेमानुविद्धहृदय प्रियभक्त लभ्ये
रामानुजाङ्घ्रिकमले रमतां मनो मे॥ 8॥

श्लोकाष्टकमिदं पुण्यं यो भक्त्या प्रत्यहं पठेत्।
आकारत्रयसम्पन्नः शोकाब्धिं तरति ध्रुवम्॥ 9॥

॥ इति श्री रामानुजाष्टकं समाप्तम्॥

sunder kidambi prapatti dot com sunder kidāmbi